National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(57): 224-226
© 2024 NJHSR
www.sanskritarticle.com

**प्रज्ञापारमितापण्डा**
गवेषिका, विभागः साहित्यम्,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**प्रज्ञापारमितापण्डा**
गवेषिका, विभागः साहित्यम्,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# सिद्धान्तसुधाग्रन्थस्य सामाजिकोपयोगिता

**प्रज्ञापारमितापण्डा**

वयं सामाजिकाः। अस्याः समाजचेतनायाः सामाजिकतायाः वोत्कृष्टं निदर्शनमक्षरपुरुषोत्तमदर्शने सन्निहितं वर्तते। औपनिषदामृषीणां मुनीनाञ्च चिन्तनं महद्दर्शनञ्च भारतीयजनमानसं विश्वसभायां सर्वोच्चेन श्रेष्ठेन पदेनालङ्कृतवत्। यदाखिलं जगत्तसमाच्छन्नमासीत्। तदा प्राचीनाः भारतीयाः सर्वापेक्षयाधुनिकाः आसन्। तेषां समाजसंस्कृतिः नः प्रमाणम्। तेषां समाजचेतनायां बह्व्यः दिशोऽस्माभिः परिलक्षितुं शक्यन्ते।

**उदात्तदृष्टिः**

जगति जनिमतां समेषामुपर्युदात्तदृष्टिं वयं संस्थापयेमेत्यौपनिषदेभ्यः आचार्येभ्यो वयं ज्ञातुं शक्नुमः। मानवाः इतरेभ्यः बुद्धिमन्तः। कारणं हि तत्र मानवता। उच्यते तावत्

**"आहारनिद्राभयमौथुनं च सामान्यमेतत् पशुभिर्नराणाम्।**

**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समाना ॥"** इति

अर्थाद्धर्मसेवकाः मानवाः इतरेभ्यः उन्नताः। परन्तु न कदापि इतरान् दण्डयेयुः पीडयेयुः च। विश्वेऽस्मिन् सर्वेषु प्राणिषु समभावः स्थापनीयः। सर्वेषां शुभं भूयादित्युपनिषन्निसृता वाण्येव जगतः चालिका शक्तिः। असीमेन सह जीवात्मनः समानतेत्युपनिषच्छिक्षा। कठोपनिषद्युच्यते –

**"न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥"**[1]

अर्थादात्मनः जननं मरणं च किमपि नास्ति। आत्मा नित्यः, शाश्वतः, पुराणश्च। आत्मा न कदापि हन्यते। शरीरस्यैव वृद्धिक्षयादिकंन त्वात्मनः। वयं मूढाः सर्वे शरीरमेव आत्मत्वेन स्वीकुर्मः। शरीरे नष्टेऽहं नष्टः इति सर्वदा भीताः वयं तिष्ठामः। किन्त्वात्मनः जन्ममरणरहितत्वं ज्ञात्वा वयं साहसिकाः भवेम। सर्वदैव उदात्तदृष्ट्या जगत्पश्यामश्चेदस्माकमन्तर्निहिता शक्तिः वर्धेत। पुनः रथरूपकल्पनमपि अस्माकमुदात्तदृष्टेः परिचायकम्। कठोपनिषदि –

**"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥"**[2]

अस्माकं शरीरं रथसदृशम्। तत्र रथस्य प्रधानः आत्मा। सारथिः बुद्धिः। प्रग्रहं मनः। अर्थादस्माकं जीवने यदि बुद्धेः मनसः च कार्यं वयं जानीमः, तदा तमसाग्रस्तेन मनसाकार्यं किमपि न स्यात्। इयमेवोदात्तचिन्तास्माभिः परिपालनीया।

अखिलं समस्तं समग्रं जगदिदं परमेश्वरस्यैवाधीनम्। सर्वे जीवाः मत्समानाः। सर्वे जीवात्मनः परमात्मना सहाभेदाः इति मोदमानाः वयं संस्कृतमयं विश्वं स्रष्टुं स्रक्ष्यामः। सर्वोपर्यस्माकमुदात्तभावनायाः श्रेष्ठं निदर्शनं तावत् –

अयं निजः परो वेतीति गणना लघुचेतसाम्।

**"उदारचरितानां तु वसुधैव कुटुम्बकम्॥"**[3] इति

अयं मत्सम्बन्धी, अयं न मामकीनः इति गणना लघुचेतसामज्ञानिनां भवति। परन्तु समस्तं चराचरं मम मित्रमित्युदात्तविचारः केवलं ज्ञानिनामुदारचरितानामेव भवति।

साम्प्रतमस्माकं भारतमपि करोनाकाले सर्वेभ्यः देशेभ्यः औषधं भोजनसामग्रीं च सम्प्रेष्योदारतायाः निदर्शनमस्थापयद्यदवश्यमेव विश्वन्द्यम्। सैव विषयः अक्षरपुरुषोत्तदर्शने समीचीनरीत्या प्रतिपादितमस्ति –

**महतः परमव्यक्तम्। अव्यक्तात् पुरुषः परः**[4] इत्यत्र अव्यक्तपदवाच्यम् अक्षरब्रह्म इति भणितम्। तथाहि **इन्द्रियेभ्यः परा ह्यर्थाः**[5] इत्यारभ्य **सोऽध्वनः पामाप्नोति तद्विष्णोः परमं पदम्**[6] इत्यन्तेन दिव्याऽक्षरधामस्थितपरमात्मसहजानन्दाऽवाप्तिलक्षणपरम-पुरुषार्थोपायाऽनुकूलसोपानोपदेशः। तत्र इन्द्रियाद्युत्तरोत्तरविजये अध्वपाराऽऽप्तिः फलम् इति। तत्र शरीरात् हि सूक्ष्माणि इन्द्रियाणि पराणि। तेभ्यः चक्षुरादिभ्यः विषयसन्निधानमात्रेण तेषाम् इन्द्रियाणां विषयप्रवणतोद्भवाच्छब्दस्पर्शरूपादयः अर्थाः प्रबलाः भवन्ति। एतेभ्यः अर्थेभ्यः तेषामिन्द्रियाणां व्यापरस्य विरामो भवति चेदपि बाह्यशब्दस्पर्शाद्यर्थसंसर्गं विना तत्सङ्कल्पपरमप्रभुत्वात् मनः परम्। बुद्धिद्वारा निश्चितस्य मनसा अनुमननदर्शनत्वात् वदति मनसस्तु परा बुद्धिरिति। तस्याश्च बुद्धेः देहेन्द्रियान्तकरणादीनां समेषाम् अधिष्ठातृत्वात् आत्मा एव महान् इति।

**समदृष्टिः**

प्रतियोगितामूलकोऽयं संसारः। सर्वास्वपि दिक्षु स्वं प्रतिष्ठापयितुं सर्वे चेष्टन्ते। प्रतियोगिनो वयं समाजसंस्काराय कथं समदृष्टिं रक्षेम तदपि ग्रन्थस्यास्याध्ययननेन ज्ञायते। ईशावास्योपनिषदि प्रोक्तं –

**"यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥"**[7] इति

यः परमात्मरमर्मज्ञः आत्मन्यर्थात्स्वात्मन्येवाव्यक्तादीनि स्थावरान्तानि सर्वाणि भूतान्यनुपश्यति। सः सर्वभूतेषु स्वात्मानमेव पश्यति। तेन सर्वप्राणिभिः सह एकात्मतानुभूयते। सर्वेष्वात्मवत्स्निह्यति। आत्मभिन्नं तद्व्यतिरिक्तं किमपि नानुपश्यति। एकात्मतानुभवादव्यक्तादिस्थावरान्तेषु सर्वत्र स्वात्मानमेव प्रत्यक्षं करोति।

**"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**

**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥"**[8] इति

निरतिशयं निर्विशेषं प्रकृतमात्मतत्त्वं विजानद्भिः आत्मज्ञैः मुमुक्षुभिः परमार्थदर्शिभिः सर्वभूतेष्वात्मभावनया, किञ्चात्मसु सर्वभूतभावनया सर्वमात्मत्वेनैव मन्यते। सर्वत्र परमात्मदर्शनात्परज्ञानलाभाच्च तेभ्यः शोकमोहाद्यन्धकारो दूरीभूतो भवति। तथाहि संग्रहे भणितमस्ति –

**ब्रह्मसर्वगुणाऽवाप्तिस्तद्भावे नैव वाञ्छिता।**

**कल्याणे तूपयुक्ता ते तद्गुणमात्रसंग्रहात्॥**[9]

**कार्याऽऽख्यानादपूर्वत्वं ब्रह्मभावस्य सिध्यति।**

**अन्यथा स्याद् विधिर्व्यर्थस्तद्भावप्रतिपादकः॥**[10]

**समाजसंस्कारः**

समाजसंस्कारे सिद्धान्तसुधाग्रन्थस्य महती भूमिका वर्तते। जगति सर्वासां जातीनां संस्कृतिः भिन्नैव। भारतीया संस्कृतिः वेदोपनिषदाश्रिता। तत्र तत्र निर्दिष्टं जीवनतत्त्वमेव समाजसंस्काराय प्रवर्तते। यथा तैत्तिरीयोपनिषदि बहुधा समाजसंस्कारस्य चित्रं प्राप्यते। यथोदाहरणत्वेन दानक्रिया कथं कार्येति उपनिषद्वदति–

**"श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्॥"**[11] इति। अर्थाच्छ्रद्धया देयम्, अश्रद्धया न देयं,सम्प्रदानुगुण्येन देयं, ह्रिया देयं, भयेन देयम्। ज्ञात्वैव देयम्। वेदेषु यज्ञदानतपांसि विहितानि सन्ति। गृहस्थैः अवश्यमेतान्यनुष्ठेयान्येव। प्रकृतमन्त्रे दानस्य विचारः क्रियते। श्रद्धया दानं कर्तव्यम्। गुरुशास्त्रवाक्येषु विश्वासः श्रद्धा शास्त्रीयेषु कर्मसु श्रद्धैव प्रधानम्। अतः श्रद्धयैव हि शास्त्रीयाणि कर्माणि कर्तव्यानि। दानमश्रद्धया कृतं चेद्भस्मनि हुतं हविरिव व्यर्थं भवति। अतोऽश्रद्धया दानं न कर्तव्यम्। सम्पदमनुसृत्य देयम्।

श्रीमताधिकमेव देयम्। दरिद्रेण तु स्वसामर्थ्यानुगुण्येन दातव्यम्। सङ्कोचस्वभावेन भयभक्त्या देयम्। दानेन सर्वपापक्षयः, दानेन सर्वकामावाप्तिः। अश्रद्धया हुतं दत्तं तपस्तप्तं चेत्सर्वं तन्निष्फलमेव भवति। अतः श्रद्धयैव दानं कर्तव्यम्। अतो व्यासवचनं तावदत्र यथार्थं प्रतिभाति –

**"अष्टादशपुराणानां सारं व्यासेन कीर्तितम्।**

**परोपकारः पुण्याय पापाय परपीडनम्॥"**[12]**इति**

इतोऽप्यस्माकं चारित्र्यं व्यवहरणं चिन्तनं कार्यं च सर्वविधकल्याणेषूपनिषदां माहात्म्यं वर्तते एव। येन समाजसंस्कारायोपनिषदग्रगण्या। तथाहि ग्रन्थकारो लिखति तस्य सिद्धान्तसुधाऽऽख्ये ग्रन्थे -

**स्वतोऽननुभूताऽर्थेप्यास्तिक्यबुद्धिर्गुरुहरितदुपदिष्टशास्त्रप्रबोधितसिद्धान्ते सत्यता धीर्वा विश्वासः। सम्प्रादायसिद्धान्तसाधनाऽऽचारपरम्परादिरक्षकोऽयम्।**

**परब्रह्मसहजान्दगुणातीतानन्दस्वामिमहाराजादिगुरुपरम्पराप्रबोधितजीवेश्वरमायाऽक्षरब्रह्मपरब्रह्मेति तत्त्वपञ्चकस्वरूपगुणाद्युपदेशेषु परमसत्यताबुद्धिः सिद्धान्तश्रद्धा।**[13]

**ग्रन्थसूची**


- ईशादि नौ उपनिषत्. शाङ्करभाष्यसमेता. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.- २०६८।

- ईशोपनिषत्. Delli : Narendra Prakash Jain, Matilal Banarsidass, २००२।
- उपनिषद्भाष्यम्. प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया कठतैत्तिरीयभाष्याणां माण्डूक्यप्रसिद्धाचार्यान्तरटीकाभिः सटीक तैत्तिरीयवार्तिकेन च समलङ्कृतम्. सम्पादकः- संएस. सुब्र .-ह्मण्यशास्त्री. वाराणसी श्रीदक्षिणामूर्तिमठ-प्रकाशन-, २०००।
- कठोपनिषत्(बङ्गपुस्तकम्). अनुवादकः व्याख्याकारश्च – स्वामी भूतेशानन्दः. कलिकाता : उद्बोधन-कार्यालयः. २००९।
- स्वामिनारायणसिद्धान्तसुधा, परब्रह्मस्वामिनारायणप्रबोधितम्, अक्षरपुरुषोत्तमदर्शनम्, ग्रन्थकारः, महमहोपाध्यायः साधुभद्रेश-दाशः, स्वामिनारायण अक्षरपीठ अमदावाद


**पादटिप्पणी –**

[1]कठोपनिषत् १/२/१८

[2]कठोपनिषत् १/३/३

[3]महोपनिषत् ४/७८

[4]कठोपनिषत् ३।११

[5]कठोपनिषत् ३।१०

[6]कठोपनिषत् ३।९

[7]ईशावास्योपनिषत् ६

[8]ईशावास्योपनिषत् ७

[9]साधनधारा. ४४८

[10]साधनधारा. ४४९

[11]तैत्तिरीयोपनिषत् १-११

[12]अद्भूतश्लोकः

[13]सिद्धान्तसुधा.पृ. ३६०